ॐ

     

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# श्री-सुरेश्वराचार्य-स्मरणम्

## सुरेश्वराचार्य-कृता भगवत्पाद-स्तुतिः

वेदान्तो·दर-वर्ति भास्व·दमलं ध्वान्त-च्छि·दस्मद्-धियः
दिव्यं ज्ञान·मतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित्।
यो नो न्याय-शलाकयै·व निखिलं संसार-बीजं तमः
प्रोत्सार्या·विरकार्षीद् गुरु-गुरुः पूज्याय तस्मै नमः॥ १॥

—नैष्कर्म्यसिद्धिः - ४.७६-७७

आ शैला·दुदयात् तथाऽस्त-गिरितो भास्वद्-यशो·राशिभिः
व्याप्तं विश्व·मनन्धकार·मभवद् यस्य स्म शिष्यै·रिदम्।
आराद् ज्ञान-गभस्तिभिः प्रतिहत·श्चन्द्रायते भास्करः
तस्मै शङ्कर-भानवे तनु-मनो·वाग्भि·र्नमः स्यात् सदा॥ २॥

यत्-प्रश्नो·दधि-युक्ति-शब्दन-खज-श्रद्धै·क-स·न्नेत्रक-
स्थैर्य-स्तम्भ-मुमुक्षु-दुःखित-कृपा-यत्नो·त्थ-बोधा·मृतम्।
पीत्वा जन्म-मृति-प्रवाह-विधुरा मोक्षं ययु·र्मौक्षिणः
तं वन्देऽत्रि-कुल-प्रसूत·ममलं वेधो·भिधं मद्-गुरुम्॥ ३॥

—बृहदारण्यकभाष्यवार्त्तिकम्

# सुरेश्वराचार्य-विषयाः स्तुतयः

यदीय-सम्पर्क·मवाप्य केवलं वयं कृता·र्था नि·रवद्य-कीर्तयः।
जगत्सु ते तारित-शिष्य-पङ्क्तयो जयन्ति देवे·श्वर-पाद-रेणवः॥ १॥

—श्रीसर्वज्ञात्मेन्द्रसरस्वतीश्रीचरणैः विरचितम् सङ्क्षेपशारीरकम्

नैष्कर्म्य-सि·द्ध्यभिधया सुधया सुधियां ददौ।
योऽमृतत्वं नमाम·स्तं सुरेश्वर-सुधा-निधिम्॥ २॥

—श्रीज्ञानानन्देन्द्रसरस्वती-श्रीचरणैः विरचिता चन्द्रिकाख्या नैष्कर्म्यसिद्धि-व्याख्या

गौडः काश्मीर-जन्मा कलित-परिचितिः पूर्व-तन्त्रे कुमारात्
ब्रह्मण्यः सर्व-वेदः स्फुट-शपथ-पथं श्रीम·दाचार्य-योधी।
संन्यासं प्रापित·स्तं त·दनु परिचरन् योग-भूमै·क-सीमा
तस्या·देशेन काञ्च्या·मवस·दथ समाः सप्ततिं काम-पीठे॥ ३॥

वर्षे शुद्धतरे (२६९५) कले·रथ भवे ज्येष्ठे सित-द्वादशी-
रात्रौ चित्रित-सर्व-भूः स यशसा श्रीमान् सुरेशः स्वयम्।
श्रित्वा पुण्य-रसां रसेन महता युञ्जन् लया·ख्ये पथि
श्लक्ष्ण-श्री-शिव-लिङ्ग-भूय·मभजत् साक्षात् सतां पश्यताम्॥ ४॥

—श्रीसर्वज्ञसदाशिवबोधेन्द्रकृता पुण्यश्लोकमञ्जरी

स्थिर-बोध-घन-प्रताप-दाम्नो·र्गुरु-पृथ्वीधव-विश्वरूप-नाम्नोः।
चिर·मर्थनयो·प-तुङ्ग-भद्रं स-रसः सौतु सुरेश्वरः स भद्रम्॥ ५॥

प्रणयन् लय-योग·मक्षु·दञ्च्यं पुन·राचार्य-मठे निपद्य काञ्च्याम्।
भुवि यः शिव-लिङ्ग-भूय·मन्ते प्रविवान् सोऽस्तु सुखाय नः सुशान्तः॥ ६॥

प्रथिते किल कामकोष्ठ-नाम्नि प्रथते पुण्य-रसे·ति यत् पवित्रम्।
पद·मस्य गुरोः समाधि-भूमेः प्रणये मण्डन-चिह्नितं निकामम्॥ ७॥

—श्रीसदाशिवेन्द्रसरस्वतीश्रीचरणविरचिता जगद्गुरुरत्नमाला

पवित्रिते·तरा·द्वैत-मठ-पीठी-शिरो-भुवे ।
श्री-काञ्ची-शारदा-पीठ-गुरवे भव-भीरवे॥ ८॥

वार्तिका·दि-ब्रह्म-विद्या-कर्त्रे ब्रह्मा·वतारिणे।
सुरेश्वरा·चार्य-नाम्ने योगी·न्द्राय नमो नमः॥ ९॥

—पञ्चषष्टितमैः पीठाधिपतिभिः श्रीमत्सुदर्शनमहादेवेन्द्रसरस्वतीश्रीचरणैः प्रणीतः श्री-काञ्ची-कामकोटि-पीठ-जगद्-गुरु-परम्परा-स्तवः

# सुरेश्वराचार्य-वागमृतम्

सत्यं ज्ञान·मनन्त·मेक·ममलं ध्वस्ता·न्धकारं परं
निर्·द्वैतं हृदि पद्म-मध्य-निलयं निश्शेष-धी-साक्षिणम्।
वेदान्तो·पनिविष्ट-बोध-विषयं प्रत्यक्तया योगिनां
भक्त्या तं प्रणिपत्य वेद-शिरसो वक्ष्यामि सद्-वार्तिकम्॥ १॥

यस्ये·दं सकला·मले·न्दु-किरण-प्रख्यै·र्यशो·रश्मिभिः
व्याप्तं य·श्च कृपालुता-पर-वश·श्चक्रे हितं दुःखिनाम्।
यद्-वाणी-कुलिशा·वरुग्ण-मतयः पेतु·र्दिश·स्तार्किकाः
भक्त्या पूज्यतमं प्रणम्य त·महं तद्-भाष्य-नीतौ यते॥ २॥

तैत्तिरीयक-सारस्य वार्तिका·मृत·मुत्तमम्।
मस्करी·न्द्र-प्रणीतस्य भाष्यस्यै·तद् विवेचनम्॥ ३॥

मुमुक्षा-सार्थवाहस्य भव-नाम-भृतो यतेः।
शिष्य·श्चकार तद्-भक्त्या सुरेशा·ख्यो महार्थ-वित्॥४॥

ध्यानै·क-तान-निबिडा·हित-चेतसोऽजं
प्रध्वस्त-कृत्स्न-निज-मोह-समस्त-दोषम्।
प्रत्यक्-तया शुभ-धियो यतयो·भ्युपेत्य
यं देव·मेक·ममलं प्रविशन्ति सोऽव्यात्॥५॥

—सुरेश्वराचार्यकृतं तैत्तिरीयोपनिषद्भाष्यवार्त्तिकम्

❀❀❀